
चतुर्थः पाठः

# विद्यया भान्ति सद्गुणाः



**देव! महाकुलसम्भूता एते राजपुत्राः, तन्मया नीतिं ग्राहयितुं शक्यन्ते।**

| | |
|---|---|
| मालविका | भो सुकुमार! किमर्थं चिन्तितः असि? |
| सुकुमारः | मम अनुजस्य पठने रुचिः न अस्ति। |
| मालविका | सुकुमार! मम पुस्तके एका कथा अस्ति, यत्र एकः राजा अपि एवमेव चिन्तितः आसीत्। |
| सुकुमारः | सत्यम्? किं कृतं तदा तेन राज्ञा ? |
| मालविका | तदा राज्ञा एकः विद्वान् आहूतः। सः सुरोचकाभिः कथाभिः राजपुत्रान् नीतिशास्त्रम् अपाठयत्। तासां कथानां सङ्ग्रहः अपि विद्यते। |
| सुकुमारः | आश्चर्यम्। किं नाम तत् पुस्तकम् ? |
| मालविका | तस्य नाम हितोपदेशः। तस्य प्रारम्भे एव इदं वर्णितं यत् विद्यां विना मनुष्यस्य जीवनं व्यर्थम्। |
| सुकुमारः | पठनीयं तत् पुस्तकम्। |
| मालविका | मया सह आगच्छ। अद्यैव अस्माकम् आचार्यः तां कथां पाठयिष्यति। |
| सुकुमारः | मम एतत् सौभाग्यम्। पठामः तावत् पाठम्। |

चतुर्थः पाठः

# विद्यया भान्ति सद्गुणाः

अस्ति भागीरथीतीरे पाटलिपुत्रनामधेयं नगरम्। तत्र सर्वस्वामिगुणोपतः सुदर्शनः नाम नरपतिः आसीत्। स भूपतिः एकदा पठ्यमानं श्लोकद्वयं श्रुतवान्।

**अनेकसंशयोच्छेदि परोक्षार्थस्य दर्शकम्।**
**सर्वस्य लोचनं शास्त्रं यस्य नास्त्यन्ध एव सः॥ 1॥**
**यौवनं धनसम्पत्तिः प्रभुत्वमविवेकिता।**
**एकैकमप्यनर्थाय किमु यत्र चतुष्टयम्॥ 2॥**

आत्मनः पुत्राणाम् अनधिगतशास्त्राणां नित्यमुन्मार्गगामिनाम् आचारहीनतया उद्विग्नमनाः स राजा अचिन्तयत् –

**स जातो येन जातेन याति वंशः समुन्नतिम्।**
**परिवर्तिनि संसारे मृतः को वा न जायते॥ 3।**
**वरमेको गुणी पुत्रो न च मूर्खशतान्यपि।**
**एकश्चन्द्रस्तमो हन्ति न च तारागणैरपि॥ 4॥**

तत् कथम् इदानीम् एते मम पुत्राः गुणवन्तः क्रियन्ताम् ?

यतः–

**माता शत्रुः पिता वैरी येन बालो न पाठितः।**
**न शोभते सभामध्ये हंसमध्ये बको यथा॥ 5।**
**रूपयौवनसम्पन्ना विशालकुलसम्भवाः।**
**विद्याहीना न शोभन्ते निर्गन्धा इव किंशुकाः॥ 6॥**

अत्र तु दैवं कारणमिति न उचितम्, अतः सर्वथा दैवम् आलस्यं च विहाय पुरुषार्थः विधेयः। एतत् चिन्तयित्वा राजा पण्डितसभां कारितवान्। राजा अवदत् – 'भोः भोः पण्डिताः!' श्रूयतां मम वचनम् – 'अस्ति कश्चिद् एवम्भूतो विद्वान् यो मम पुत्राणां नित्यम् उन्मार्गगामिनाम् अनधिगतशास्त्राणाम् इदानीं नीतिशास्त्रोपदेशेन पुनर्जन्म कारयितुं समर्थः?'

अत्रान्तरे विष्णुशर्मनामा महापण्डितः सकलनीतिशास्त्रतत्त्वज्ञः बृहस्पतिः इव अवदत् – 'देव! महाकुलसम्भूता एते राजपुत्राः, तत् मया नीतिं ग्राहयितुं शक्यन्ते।' अतोऽहं षण्मासाभ्यन्तरे भवत्पुत्रान् नीतिशास्त्राऽभिज्ञान् करिष्यामि। राजा सविनयं पुनरवदत्–कोऽत्र सन्देहः ?

**कीटोऽपि सुमनःसङ्गादारोहति सतां शिरः।**
**अश्मापि याति देवत्वं महद्भिः सुप्रतिष्ठितः॥ 7॥**

तदेतेषाम् अस्मत्पुत्राणां नीतिशास्त्रोपदेशाय भवन्तः प्रमाणम् इति उक्त्वा तस्य विष्णुशर्मणः करे बहुमानपुरःसरं पुत्रान् समर्पितवान्।

ततः विष्णुशर्मा पशु–पक्षि–जन्तूनां मनोरञ्जकाभिः, प्रेरणाप्रदाभिश्च कथाभिः तान् राजकुमारान् शिक्षितवान्। एतासां कथानां सङ्कलनमेव 'हितोपदेशः' नामकः ग्रन्थः प्रसिद्धः जातः।

## शब्दार्थाः

| | | | |
|---|---|---|---|
| **अनधिगतशास्त्राणाम्** (वि०) [न अधिगतम् अनधिगतम् (नञ् तत्पु०) अनधिगतं शास्त्रं यैस्ते अनधिगतशास्त्राः, तेषाम् (ब०व०)] | शास्त्रज्ञानशून्यानाम् | विद्याध्ययन से रहित (पुत्रों का) | of those who have not studied shastras. |
| **अनेकसंशयोच्छेदि** (वि०) [अनेकसंशयान् उच्छेत्तुं शीलमस्य तत् णिनिप्रत्ययान्तम् नपुं०, प्र० ए०व०] | बहुविधसंशयानां नाशकम् | अनेक प्रकार के संशयों को दूर करने वाला | eradicator of various doubts |
| **अभिज्ञानान्** (वि०) [अभिजानन्ति इति अभिज्ञाः तान्, पुं०द्वि०ब०व०, अभिज्ञ शब्दः] | ज्ञानसम्पन्नान् | निपुणता युक्तों को | to those who are knowledgeable. |
| **अविवेकिता** (सं०)[विवेकस्य भावः विवेकिता (विवेक+तल्) न विवेकिता (नञ् त०पु०) | विवेकशून्यता | कर्त्तव्य अकर्त्तव्य का ज्ञान न होना | without having the sense of dis crimination. |
| **अश्मापि** (सं०) [अश्मा+अपि (अश्मन्, पुं०, प्र०ए०व०)] | पाषाणम् अपि | पत्थर भी | even a stone. |
| **आचारहीनतया** (सं०) (स्त्री० तृ०ए०क०)[आचारेण हीनता तया (तृ० त० पु०)] | सदाचारस्य अभावात् | सदाचार से रहित होने के कारण | due to lack of good conduct. |
| **आरोहति** (क्रि०)(आ+रुह् लट् प्र० पु०ए०व०) | आरोहणं करोति | चढ़ता है | climbs |
| **उद्विग्नमनाः** (वि०)[उद्विग्नं मनः यस्य सः (ब०व्री०)] | खिन्नमनाः | चिन्ता से व्याकुल मन वाला | one with a disturbed mind. |
| **उन्मार्गगामिनाम्** (वि०) | कुपथगामिनाम् | कुमार्गगामी अर्थात् जुआ आदि दुर्व्यसनों में लगे हुए | going astray |

| | | | |
|---|---|---|---|
| **कारितवान्** (क्रि०) [कृ+णिच्+क्तवतु, पुं०प्र०वि०ए०व०) | अकारयत् | करवाई | accomplished. |
| **किंशुकाः** (सं०) (पु०प्र०ब०व०) | पलाश नाम पुष्पविशेषाः | पलाश के फूल। (पलाश के फूल सुन्दर तो बहुत होते हैं पर सुगन्ध न होने से वे शोभा या आदर को नहीं प्राप्त होते) | name of a flower 'Kinshuka' (buteafrondo'sa). |
| **क्रियन्ताम्,** ['कृ' कर्मवा०, लोट्, प्र०पु०ब०व०] | विधीयन्ताम् | किये जाएँ | may be done. |
| **गुणवन्तः** (वि०) [गुण+मतुप्, पुं०प्र०ब०व०] | विद्यासंस्कारयुक्ताः | विद्या, विनय आदि गुणों से पूर्ण | virtuous |
| **ग्राहयितुम्** (अव्य०) [ग्रह्+णिच्+तुमुन्] | सम्यग् बोधयितुम् | अच्छी प्रकार से ज्ञान कराने के लिए | to make one comprehend |
| **जातः** (वि०) [जन्+क्त, पुं०प्र०ए०व०] | उत्पन्नः भवति | उत्पन्न होता है | is born. |
| **जायते** (क्रि०) [जन्, लट् प्र०पु०ए०व०] | उत्पद्यते | पैदा होता है | takes birth. |
| **दैवम्** (सं०) (नपुं०द्वि०ए०) | भाग्यम् | भाग्य को | fate. |
| **नीतिम्** (सं०) [नी+क्तिन्, स्त्री०द्वि०ए०व०] | नीतिशास्त्रम् | नीतिशास्त्र को | moral science or the science of political ethics. |
| **पठ्यमानम्** (वि०) [पठ्+कर्मवा०+शानच्०द्वि०ए०व०] | उच्यमानम् , उच्चार्यमाणम् | पढ़े जाते हुए को | being recited |
| **परोक्षार्थस्य** (सं०)(पुं०ष०ए०व०)[अक्ष्णोः (इन्द्रियाणां) परः इति परोक्षः; परोक्षः चासौ अर्थः परोक्षार्थः तस्य (कर्मधा०) ] | सूक्ष्मपदार्थस्य, | भूतभविष्यत्कालिक सूक्ष्मपदार्थों (घटनाओं) का | of the unforseen |
| **पाठितः** (वि०) [पठ्+णिच्+क्त, पुं०प्र०ए०व०] | अध्यापितः | पढ़ाया गया | taught. |

| | | | |
|---|---|---|---|
| **प्रभुत्वम्**<br>(सं०) [प्रभु+त्व] (नपुं०प्र०ए०व०) | स्वामित्वम् | स्वामित्व | might/power. |
| **बहुमानपुरस्सरम्**<br>(क्रि० वि०) | बहुसम्मानपूर्वकम् | बहुत सम्मान के साथ | most respectfully |
| **बृहस्पतिः**<br>(सं०) (पुं०, प्र० ए०व०] | देवानां गुरुः | देवताओं के गुरु का नाम | teacher of deities. |
| **भागीरथीतीरे**<br>[भागीरथ्याः तीरे (ष० त०पु०] | गङ्गायाः तटे | गंगा के किनारे | on the bank of the Ganges. |
| **महाकुलसम्भूताः** (वि०)<br>महत् यत् कुलं–महाकुलम् (कर्मधा०) तस्मात् सम्भूताः (पं०त०पु०] | उच्चकुले उत्पन्नाः | उच्चकुल (राजकुल) में उत्पन्न हुए | born in high family |
| **याति**<br>(क्रि०)[(या लट् प्र०पु०ए०व०) | गच्छति, प्राप्नोति | जाता है, प्राप्त होता है | goes, gets |
| **रूपयौवनसम्पन्नाः** (वि०)<br>[रूपं च यौवनं च रूपयौवने (द्व०) ताभ्यां सम्पन्नाः (तृ० त० पु०)] | सौन्दर्येण तारुण्येन च युक्ताः | रूप और जवानी से सम्पन्न | endowed with beauty and youth. |
| **विशालकुलसम्भवाः** (वि०)<br>(पुं० प्र०ब०व०)[विशालं कुलम्, विशालकुलम्, (कर्मधा०), विशालकुले सम्भवाः (स०त०)] | विशालकुले जाता | ऊँचे कुल में उत्पन्न हुए | born in an illustrious family. |
| **विहाय**<br>(अव्य)(वि+हा+ल्यप्) | त्यक्त्वा | छोड़कर | having given up |
| **श्रुतवान्**<br>(वि०)[क्तवत्, प्र०पु०ब०व०] | अश्रृणोत् | सुना | heard |
| **सकलनीतिशास्त्रतत्त्वज्ञः**<br>(वि०) (प्र०पु०ए०व०) | सकलानि च तानि नीतिशास्त्राणि, तेषां तत्त्वं जानाति इति तत्त्वज्ञः, (ष०त०) समस्तनीतिशास्त्राणां रहस्यानां ज्ञाता | समस्तनीतिशास्त्रों के गूढ़ अभिप्रायों को जानने वाला | one who knows the basics of all Niti-shastras |
| **सुमनःसङ्गात्** (सं०)<br>(पु०प०ए०व०)<br>[सुमनसां सङ्गः, तस्मात् (ष०त०पु०)] | पुष्पाणां योगात् | फूलों के योग से | in the company of flowers. |

# इदमपि जानन्तु

## सन्धियुक्तपदानि

| | | | | | |
|---|---|---|---|---|---|
| नास्त्यन्धः | = | न+अस्ति+अन्धः | एकैकमप्यनर्थाय | = | एक+एकम्+अपि+अनर्थाय |
| मूर्खशतान्यपि | = | मूर्खशतानि+अपि | तारागणैरपि | = | तारागणैः+अपि |
| सङ्गादारोहति | = | सङ्गात्+आरोहति | तदेतेषाम् | = | तत्+एतेषाम् |
| एकश्चन्द्रस्तमः | = | एकः+चन्द्रः+तमः | प्रेरणाप्रदाभिश्च | = | प्रेरणाप्रदाभिः+च |
| अश्मापि | = | अश्मा+अपि | कीटोऽपि | = | कीटः+अपि |

## सन्धिकार्यम्

| | | | | | |
|---|---|---|---|---|---|
| पुरुषार्थः+विधेयः | = | पुरुषार्थो विधेयः | दैवम्+कारणम् | = | दैवं कारणम् |
| इति+उक्त्वा | = | इत्युक्त्वा | बृहस्पतिः+इव | = | बृहस्पतिरिव |
| कथाभिः+तान् | = | कथाभिस्तान् | नामकः+ग्रन्थः | = | नामको ग्रन्थः |

## संयोगः

| | | | | | |
|---|---|---|---|---|---|
| प्रभुत्वमविवेकिता | = | प्रभुत्वम्+अविवेकिता | नित्यमुन्मार्गगामिनाम् | = | नित्यम्+उन्मार्गगामिनाम् |
| कारणमिति | = | कारणम्+इति | सङ्कलनमेव | = | सङ्कलनम्+एव |

# अभ्यासः

**1. अधोलिखितानां प्रश्नानाम् उत्तराणि एकपदेन लिखत –**

(क) पाटलिपुत्रनामधेयं नगरं कुत्रास्ति ? ....................................

(ख) पाटलिपुत्रनगरस्य राजा कः आसीत्? ....................................

(ग) सर्वस्य लोचनं किं भवति? ....................................

(घ) हंसमध्ये कः न शोभते ? ....................................

(ङ) किं विहाय पुरुषार्थः विधेयः ? ....................................

(च) कः राजपुत्रान् शिक्षयितुं स्वीकृतवान् ? ....................................

(छ) महद्भिः सुप्रतिष्ठितः देवत्वं कः याति ? ....................................

**2. अधोलिखितानां प्रश्नानामुत्तराणि पूर्णवाक्येन लिखत –**

(क) पाटलिपुत्रे कीदृशः नरपतिः आसीत् ?

..............................................................................................................

(ख) शास्त्रं किं करोति ?

..............................................................................................................

(ग) के के अनर्थाय भवन्ति ?

..............................................................................................................

(घ) विष्णुशर्मा तान् कथं शिक्षितान् अकरोत् ?

..............................................................................................................

(ङ) कस्य जन्म सफलं विद्यते ?

..............................................................................................................

(च) कीटः कथं सतां शिरः आरोहति ?

..............................................................................................................

(छ) राजाः निजपुत्रान् विष्णुशर्मणः करे कथं समर्पितवान् ?

..............................................................................................................

**3. अधोलिखितेषु वाक्येषु स्थूलपदानि आधारीकृत्य प्रश्ननिर्माणं कुरुत –**

(क) **अविवेकता** अपि अनर्थाय। ..........................................

(ख) राजा **पुत्राणाम्** आचारहीनतया उद्विग्नमनाः आसीत्। ..........................................

(ग) एकः चन्द्रः **तमः** हन्ति। ..........................................

(घ) **विद्याहीनाः** पुत्राः न शोभन्ते। ..........................................

(ङ) राजा **पण्डितसभां** कारितवान्। ..........................................

(च) **हितोपदेशः** नीतिकथानां सङ्कलनमेव। ..........................................

(छ) **विद्यया** बालकस्य पुर्नजन्म भवति। ..........................................

**4. अधोलिखितप्रश्नान् यथानिर्देशम् उत्तरत –**

(क) 'तत् कथम् इदानीम् एते मम पुत्राः गुणवन्तः क्रियन्ताम्।' अस्मिन् वाक्ये 'पुत्राः' इति पदस्य किं विशेषणपदं प्रयुक्तम्?

(ख) 'अत्र तु दैवम् कारणमिति न उचितम्' अस्मिन् वाक्ये 'भाग्यम्' इत्यर्थे किं पदं प्रयुक्तम्?

(ग) 'तत्र सर्वस्वामिगुणोपेतः सुदर्शनः नाम नरपतिः आसीत्।' अस्मिन् वाक्ये किं क्रियापदम् अस्ति?

(घ) 'अत्रान्तरे विष्णुशर्मा महापण्डितः सकलनीतिशास्त्रतत्त्वज्ञः बृहस्पतिः इव अवदत्।' अत्र 'अवदत्' इति क्रियापदस्य किं कर्तृपदं प्रयुक्तम् ?

(ङ) 'एकश्चन्द्रस्तमो हन्ति।' अस्मिन् वाक्ये एकः इति पदस्य किं विशेषणपदम् प्रयुक्तम्?

**5. अधोलिखितशब्दानां पर्यायद्वयं प्रदत्तशब्देभ्यः चित्वा लिखत –**

| | | | |
|---|---|---|---|
| (क) भागीरथी | – | गङ्गा, कालिन्दी, जाह्नवी। | ........................ |
| (ख) नरपतिः | – | भूपतिः, नृपः, सुरपतिः। | ........................ |
| (ग) लोचनम् | – | मोचनम्, नयनम्, अक्षि। | ........................ |
| (घ) चन्द्रः | – | हिमकरः, दिवाकरः, निशापतिः। | ........................ |
| (ङ) सुमनम् | – | प्रसूनम्, पुष्पम्, स्त्रजम्। | ........................ |

**6. अधोलिखितपदानां समक्षं तद्विपरीतार्थकं पदं लिखत–**

| | | | | |
|---|---|---|---|---|
| **यथा–** | **यौवनम्** | **वार्धक्यम्** | | |
| (क) | समुन्नतिम् | ........................ | (i) | सुमार्गगामिनः |
| (ख) | अनधिगतशास्त्राः | ........................ | (ii) | ज्योतिः |
| (ग) | उन्मार्गगामिनः | ........................ | (iii) | अवनतिम् |
| (घ) | तमः | ........................ | (iv) | मित्रम् |
| (ङ) | विद्वान् | ........................ | (v) | अधिगतशास्त्राः |
| (च) | शत्रुः | ........................ | (vi) | मूर्खः |

**7. अधोलिखितपङ्क्त्योः आशयेषु शुद्धम् आशयम् ( ✔ ) इति चिह्नीकुरुत –**

(क) **स जातो येन जातेन याति वंशः समुन्नतिम्।**

(i) यस्य जन्ममात्रेण वंशः समुन्नतिं याति।

(ii) यस्य जन्मनः पश्चात् वंशः समुन्नतिं याति।

(iii) यस्य गुणैः कर्मभिः च वंशः सर्वविधाम् उन्नतिं करोति।

(ख) **अस्ति कश्चित् नीतिशास्त्रोपदेशेन पुनर्जन्म कारयितुं समर्थः?**

(i) अत्र कः एवम्भूतः विद्वान् यः नीतिशिक्षया मूर्खान् पुत्रान् व्यवहारे निपुणान् कर्तुं शक्नोति?

(ii) विष्णुशर्मा एव नीतिशास्त्रोपदेशेन पुनर्जन्म कारयति।

(iii) कोऽपि मूर्खान् राजपुत्रान् नीतिशास्त्रस्य उपदेशेन व्यवहारकुशलान् सभ्यान् च कर्तुं न शक्नोति।

8. **अधोदत्ते अन्वये उचितकर्तृपदाभ्यां रिक्तस्थानपूर्तिं कुरुत –**

.................. अपि सुमन:सङ्गात् सतां शिर: आरोहति, महद्भि: सुप्रतिष्ठित: .................. अपि देवत्वं याति।

9. **कथाक्रमानुसारम् अधोलिखितानि वाक्यानि पुन: लिखत–**

(क) राजा निजपुत्रान् विष्णुशर्मण: करे समर्पितवान्।

(ख) राजा पण्डितसभां कारितवान्।

(ग) विष्णुशर्मा महापण्डित: सकलनीतिशास्त्रतत्त्वज्ञ: बृहस्पति: इव आसीत्।

(घ) भो: भो: पण्डिता: ! किं कश्चित् विद्वान् अस्ति य: मम पुत्रान् शिक्षयितुं समर्थ:।

(ङ) भागीरथी तीरे पाटलिपुत्रनामधेयं नगरम् आसीत्।

(च) राज्ञ: पुत्रा: अनधिगतशास्त्रा: नित्यमुन्मार्गगामिन: आचारहीनाश्च आसन्।

(छ) पाटलिपुत्रे सुदर्शन: नाम सर्वगुणोपत: राजा आसीत्।



## अन्वय:

1. **अन्वय:** – शास्त्रम् अनेकसंशय-उच्छेदि परोक्ष-अर्थस्य दर्शकम् (अस्ति, पुन: च एतत्) सर्वस्य (जनस्य) लोचनम् (इव) (यस्य) (पार्श्वे) न अस्ति स: (तु) अन्ध: एव अस्ति।

2. **अन्वय:** – यौवनम् धनसम्पत्ति: प्रभुत्वम् अविवेकिता च एक-एकम् अपि अनर्थाय (पर्याप्तम्) भवन्ति। यत्र चतुष्ट्यम् तत्र किम् (भविष्यति) ?

3. **अन्वय:** – येन जातेन वंश: समुन्नतिम् याति स: (एव) जात: (अस्ति) (अस्मिन्) परिवर्तिनि संसारे क: मृत: (क:) वा न जायते ?

4. **अन्वय:** – एक: गुणी पुत्र: वरम् (भवति), शतानि अपि मूर्खा: (वरम्) च न (भवन्ति), एक: चन्द्र: तम: हन्ति, (तत् तम:) तारागणै: अपि न (हन्यते)।

5. **अन्वय:** – येन (याभ्यां मातृपितृभ्याम्) बाल: न पाठित:, (तादृशी) माता शत्रु:, (तादृश:) पिता वैरी (भवति), तयो: पुत्रा: सभामध्ये (तथा) न शोभन्ते, यथा हंसमध्ये बक: (न शोभते)।

6. **अन्वय:** – (ये जना:) रूपयौवनसम्पन्ना:, विशालकुलसम्भवा: (सन्ति, ते) निर्गन्धा: किंशुका इव (कदापि) न शोभन्ते।

7. **अन्वय:** – (यथा) सुमन: सङ्गात् कीट: अपि सताम् शिर: आरोहति (तथा एव) महद्भि: सुप्रतिष्ठित: अश्मा अपि देवत्वम् याति।

# योग्यताविस्तारः

## (क) भावविस्तारः

**हितोपदेश-परिचयः** – 'हितोपदेशः' व्यावहारिक-नैतिक-राजनैतिकज्ञानैः पूर्णः लघुकथानां हृदयग्राही सङ्ग्रहः अस्ति। सुकुमार-बुद्धि-बालकेषु तदुक्तसंस्कारान् उत्पादयितुं समर्थोऽयं ग्रन्थः। अस्य सङ्ग्रहकर्ता 'नारायण-पण्डितः' अस्ति। अयं हि बङ्गीयस्य राज्ञः धवलचन्द्रस्य राज्याश्रितः आसीत्।

ग्रन्थोऽयं कथादृष्ट्या चतुर्षु भागेषु विभक्तोऽस्ति। यथा – 1. मित्रलाभः 2. सुहृद्भेदः 3. विग्रहः 4. सन्धिः। अयं हि नीति-कथा-ग्रन्थः कथ्यते। एषः हि संस्कृतोक्तिषु पाटवम्, सर्वत्र वाचां वैचित्र्यम्, नीतिविद्यानैपुण्यम् आदिगुणान् शिक्षयति।

**(ख)** पाठेऽस्मिन् विद्या-सुपुत्र-सत्सङ्गति-पुरुषार्थानां महत्त्वस्य विषये भवन्तः पठितवन्तः। तद्भावद्योतकाः केचन श्लोकाः काश्चन सूक्तयश्च अत्रापि दीयन्ते। तत्पठनेन स्वयोग्यतां वर्धयन्तु। स्वयं च सूक्तीनां सङ्कलनं कुर्वन्तु।

### विद्या

(i) न चौरहार्यं न च राजहार्यं न भ्रातृभाज्यं न च भारकारि।
व्यये कृते वर्धत एव नित्यं विद्याधनं सर्वधनप्रधानम्॥

(ii) अलसस्य कुतो विद्या, अविद्यस्य कुतो धनम्।
अधनस्य कुतो मित्रम्, अमित्रस्य कुतः सुखम्॥

(iii) संस्कारशौचेन नरं पुनीते, शुद्धा हि विद्या किल कामधेनुः।

(iv) किं किं न साधयति कल्पलतेव विद्या।

### सुपुत्रस्य महत्त्वम्

(i) को धन्यो बहुभिः पुत्रैः कुशूलाऽऽपूरणाढकैः।
वरमेकः कुलालम्बी यत्र विश्रूयते पिता॥

(ii) एकोऽपि गुणवान् पुत्रो निर्गुणैः किं शतैरपि।
एकश्चन्द्रो जगच्चक्षुर्नक्षत्रैः किं प्रयोजनम्॥

(iii) एकेनापि सुपुत्रेण विद्यायुक्तेन भासते।
कुलं पुरुषसिंहेन चन्द्रेणेव हि शर्वरी॥

### सत्सङ्गतिः

(i) जाड्यं धियो हरति सिञ्चति वाचि सत्यं,
मानोन्नतिं दिशति पापमपाकरोति।
चेतः प्रसादयति दिक्षु तनोति कीर्तिं,
सत्सङ्गतिः कथय किन्न करोति पुंसाम्॥

**पुरुषार्थः**

(i) उद्यमेन हि सिध्यन्ति, कार्याणि न मनोरथैः।
न हि सुप्तस्य सिंहस्य, प्रविशन्ति मुखे मृगाः॥

(ii) आलस्यं हि मनुष्याणां शरीरस्थो महान् रिपुः।
नास्त्युद्यमसमो बन्धुः कृत्वा यं नावसीदति॥

(iii) यथा ह्येकेन चक्रेण न रथस्य गतिर्भवेत्।
एवं पुरुषकारेण विना दैवं न सिध्यति॥

## कोऽहं वदतु साम्प्रतम्

**मेघश्यामोऽस्मि नो कृष्णो, महाकायो न पर्वतः।**
**बलिष्ठोऽस्मि न भीमोऽस्मि, कोऽस्म्यहं नासिकाकरः।**

**भावार्थः –** अहं मेघः इव श्यामवर्णीयः अस्मि परमहं देवकीनन्दनः श्रीकृष्णः नास्मि। मम शरीरं विशालम् अस्ति परन्तु अहं पर्वतोऽपि नास्मि। महाबलशाली अस्मि परं कुन्तीपुत्रः भीमः अपि नास्मि। नासिकामेव कररूपेण प्रयोक्ता अहं कः अस्मि?

## एहि हसाम

वैभवः कश्चन छात्रः। शनिवासरे सः प्रातः शय्यायां स्थित्वा कथापुस्तकं पठन् आसीत्। तस्य पिता तस्य एतादृशीं स्थितिं दृष्ट्वा तं पृच्छति–

**पिता** – किं भोः! अद्य विद्यालयं न गतवान्। अद्य अवकाशः अस्ति वा?

**पुत्रः** – पितः! अवकाशः अद्य नास्ति, रविवासरः तु श्वः अस्ति खलु?

**पिता** – तर्हि अद्य किमर्थं विद्यालयम् अगत्वा आनन्देन शयानः कथापुस्तकं पठन् अस्ति भवान्?

**पुत्रः** – पितः! ह्यः अस्माकं संस्कृतशिक्षकः एकां सूक्तिं पाठितवान् आसीत् – "**श्वः करणीयानि कुर्याद् अद्यैव बुद्धिमान्**" इति। अतः श्वस्तनं विराम-सुखम् अद्यैव अनुभवन् अस्मि।